दिनाङ्कः-04.01.2026

प्रातः - 06:55

विदेशमन्त्रालयेन वेनेजुएला

विदेशमन्त्रालयः परामर्शपत्रम् प्रसार्य वेनेजुएलादेशे भारतीयनागरिकान् शान्तिं स्थापयितुं आग्रहम् कृतवान् ।

अद्यतनघटनाक्रमाणाम् आलोके नागरिकान् वेनेजुएलादेशस्य सर्वाः अनावश्यकयात्राः परिहर्तुं परामर्शः दत्तः विदेशमन्त्रालयेन। वेनेजुएलादेशे यत्किमपि कारणेन स्थिताः भारतीयाः अत्यन्तम् सावधानतां भजन्ताम्, स्वस्य गतिविधिं न्यूनीकुर्वन्तु, कराकस्-नगरे भारतीयदूतावासेन सह सम्पर्कम् च कुर्वन्तु इति परामर्शः दत्तः । दूतावासस्य ईमेल-सङ्केतः cons.caracas@mea.gov.in अस्ति तथा च आपत्कालिक-दूरवाणी-सङ्ख्या +58-412-9584288 अस्ति ।

अमेरिकीयराष्ट्रपतिः

अमरीकायाः राष्ट्रपतिः डोनाल्ड ट्रम्पः उक्तवान् यत् तस्य निर्देशने वेनेजुएलाराजधानी कराकस् इत्यत्र विशालं सैन्याभियानम् जातम् । फ्लोरिडा-नगरे स्वस्य मार्-ए-लागो-आवासे पत्रकारसम्मेलने राष्ट्रपतिः ट्रम्पः सबलमुक्तवान् यत् वायु-स्थले, समुद्रे च अमेरिकीय-सैन्य-शक्तिः प्रचण्डा अस्ति । सः अवदत् यत् अमेरिकीयसैनिकाः वेनेजुएलादेशस्य राष्ट्रपतेः निकोलस् मादुरो इत्यस्य दण्डार्थं कराकस्-नगरे स्थितं सैन्यस्थलं लक्ष्यं कृतवन्तः । ट्रम्पः अवदत् यत् यावत् सुरक्षितं, न्याय्यं,

निष्पक्षं च सत्तासंक्रमणं न भवति तावत् अमेरिका वेनेजुएलादेशस्य शासनं निरन्तरं करिष्यति।

राष्ट्रपतिः ट्रम्पः अवदत् यत् राष्ट्रपतिः मादुरो तस्य पत्न्या सह अधुना अमेरिकीयन्यायम् सम्मुखीकरोति, न्यूयॉर्कस्य दक्षिणमण्डले मादकद्रव्य-आतङ्कवादसम्बद्धेषु आरोपेषु अभियोगः भविष्यति।

## पीएम - वॉलीबॉल

प्रधानमन्त्री नरेन्द्र मोदी द्वीसप्ततितमे वॉलीबॉल शृङ्खलायाः आभासीयम् उद्घाटनम् करिष्यति। अद्यैव वीडियो सम्मेलनद्वारा राष्ट्रियवॉलीबॉलप्रतिस्पर्धा प्रारप्स्यते। वाराणसीनगरस्य डॉ.सम्पूर्णानन्दक्रीडाङ्गणे चतुर् जनवरीतः एकादशः जनवरीपर्यन्तं शृङ्खलाः भविष्यति। उदघाटन समारोहे उत्तर प्रदेशस्य मुख्यमंत्री योगी आदित्यनाथ: उपस्थास्यति । देशस्य राज्येभ्यः संस्थाभ्यः च प्रायः त्रिसप्तति पुरुष-महिला-दलानि, येषु एकसहस्रतः अधिकाः क्रीडकाः भागं गृह्णन्ति।

## प्रधानमन्त्री-पिपरहवा

प्रधानमन्त्री नरेन्द्रमोदी भगवतः बुद्धस्य पवित्र-पिपरहवा-अवशेषाणां प्रदर्शनीम् उद्घाटितवान्। असौ उक्तवान् यत् भगवता बुद्धेन दर्शितः मार्गः प्रज्ञा च मानवतायाः कृते अस्ति तथा च तस्य पवित्राणि अवशेषानि केवलं कलाकृतयः न, अपितु देशस्य पूज्यधरोहरस्य अभिन्नाः भागाः सन्ति। एते अवशेषाः देशस्य सभ्यतायाः अभिन्नः भागः इति सः वर्णितवान्। श्रीमोदिना ह्यः नवदिल्ली-नगरे राय-पिठोरा-सांस्कृतिक-

सङ्कुलस्य भगवद्बुद्धस्य पिपरहवा पवित्रावशेषाणां भव्यायाः अन्ताराष्ट्रिय-प्रदर्शन्याः उद्घाटनं कृतम्। "प्रकाश और कमल; जागृत व्यक्ति के अवशेष" इति शीर्षकेण सः प्रदर्शनीसूच्याः अपि अनावरणं कृतवान् । बहुप्रतीक्षानन्तरं देशस्य धरोहरः पुनः आगतः इति प्रधानमन्त्रिणा उक्तम्। सः अवदत् यत् अद्यारभ्य देशस्य जनाः भगवतः बुद्धस्य एतानि पवित्राणि अवशेषाणि द्रष्टुं शक्नुवन्ति, तेषां दिव्यं आशीर्वादं च प्राप्स्यन्ति ।

भारतं न केवलं भगवतः बुद्धस्य पवित्रावशेषाणां रक्षकः अपितु तस्याः शाश्वत-परम्परायाः जीवितं वाहक अपि इति श्रीमोदिना बोधितम्।

<u>शाहः</u>

गृहमन्त्री अमितशाहः उक्तवान् यत् त्रीणि नवीनानि आपराधिकविधेयकानि २०२९ (ऊनत्रिंशत् अधिक द्विसहस्र) तमवर्षपर्यन्तं सत्रन्यायालयात् सर्वोच्चन्यायालयपर्यन्तं समये न्यायः सुनिश्चितः भविष्यति। सः , अण्डमान, निकोबारद्वीपस्य श्रीविजयपुरम इत्यत्र गृहमन्त्रालयस्य संसदीयपरामर्शसमितेः सभायाः अध्यक्षतां कुर्वन् अवदत्। शाहमहोदयेन उक्तं यत् नूतनैः आपराधिकविधेयकैः अन्वेषणं त्वरितं भवति, दोषस्य कृते दंडदरः च वर्धते।

<u>संस्कृत - साप्ताहिकी</u>

प्रियाः श्रोतारः, संस्कृतजगता सम्बद्धैः विभिन्नैः क्रियाकलापैः संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्याः एफ.एम.गोल्ड-

प्रवाहिकातः रविवासरे मध्याह्ने सार्धैक-वादनतः भविष्यति, भवन्तः सर्वे श्रोतुं प्रभवन्ति।